# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – ध्वन्यालोकः चतुर्थोद्योतः (लोचनटीकोपेतः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

प्रश्नः १ **अधोलिखितेषु द्वयोः कारिकयोः ससन्दर्भं व्याख्या कार्या।**

१ ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः।
अनेनानन्त्यमायाति कवीनां प्रतिभागुणः॥

२ युक्त्याऽनयानुसर्तव्यो रसादिर्बहुविस्तरः।
मिथोऽप्यनन्ततां याति काव्यमार्गो यदाश्रयात्॥

३ ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात्।
न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः॥

४ अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः॥

प्रश्नः २ विवक्षितान्यपरवाच्यध्वन्याश्रयेण काव्यार्थस्य नवत्वं लिखत।

प्रश्नः ३ शून्यं वासगृहं विलोक्य- अस्य विस्तारेण प्रतिपादनं कुरुत।

प्रश्नः ४ महाभारते मुख्यः कः रसः ? आनन्दवर्धनानुसारेण विवेचनं कुरुत।

प्रश्नः ५ मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः। अस्य विस्तारेण प्रतिपादनं कुरुत।

प्रश्नः ६ **अधोलिखितेषु द्वयोः कारिकयोः लोचनटीकापुरस्सरं व्याख्या कार्या।**

१ रसभावादिसम्बद्धा यद्यौचित्यानुसारिणी।
अन्वीयते वस्तुगतिर्देशकालादिभेदिनी॥

२ तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम्।
तृतीयं तु प्रसिद्धात्म नान्यत्साम्यं त्यजेत्कविः॥

३ आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।
वस्तुभावितरां तन्व्याः शशिच्छाय मिवाननम् ॥

४ अनुगतमपि पूर्वच्छायया वस्तु तादृक् ।
सुकविरूपनिबध्नन् निन्द्यतां नोपयाति ॥

प्रश्नः ७ संवादविषये आनन्दवर्धनाचार्यस्य मतं लिखत ।

प्रश्नः ८ मेधाविनां संवादाः न दोषत्वं धत्ते । इत्यस्य विवेचनं कुरुत ।

प्रश्नः ९ पुरातनी वस्तुरचना नूतने स्फुरति काव्यवस्तूनि न दुष्यति । इत्यस्मिन् विषये विवेचनं कुरुत ।

प्रश्नः १० चतुर्थोद्योतस्य विषयाः सङ्क्षेपेण प्रतिपादनीयाः ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ ध्वन्यालोकस्य प्रसिद्धा टीका का ?
२ चतुर्थोद्योते कति कारिकाः सन्ति ?
३ आनन्दवर्धनाचार्यस्य कति ग्रन्थाः ?
४ ध्वन्यालोकः कति भागेन रचितः ?
५ ध्वनिसम्प्रदायस्य स्थापना केन कृता ?
६ कुम्भसम्भवः मुनिः कः ?
७ रामायणे मुख्यः रसः कः ?
८ महाभारते मुख्यः रसः कः ?
९ आदिकविः कः ?
१० वसुदेवस्य अपत्यं कः ?
११ रमणीयतायाः लक्षणं किम् ?
१२ संवादः कतिविधः ?
१३ आनन्दवर्धनाचार्यस्य पितुः नाम किम् ?
१४ महाभारते कः कीर्त्यते ?
१५ लोचनटीका केन लिखिता ?

****